SELECTIONS

FROM

BRĀHMAṆAS AND UPANIṢADS

PART II

Prepared and prescribed for the
B.A. Examination of 1955 and onwards

THE UNIVERSITY OF BOMBAY

E BOM
550

BOM

550

SELECTIONS

FROM

BRĀHMAṆAS AND UPANIṢADS

PART II

BOM

5·50

Prepared and prescribed for the
B.A. Examination of 1955 and onwards

BY

THE UNIVERSITY OF BOMBAY

Printed by Mr. V. G. Moghe, B.A., at the Bombay University Press, Bombay 1

and

Published by Mr. S. R. Dongerkery, B.A., LL.B., Registrar, University of Bombay.

TABLE OF CONTENTS

		पृ.
१.	ऐतरेयब्राह्मण १. १३–१५	१
२.	तैत्तिरीयब्राह्मण ३, २. ८–९	५
३.	(१) शतपथब्राह्मण ११, ५, ४. १–१८	१०
	(२) शतपथब्राह्मण ११, ५, ७. १–१०	१३
४.	मुण्डकोपनिषत्	१५
५.	श्वेताश्वतरोपनिषत्	२६

PREFACE

The following passages from the Brāhmaṇas and the Upaniṣads are prescribed for the B.A. (special) examination, paper V in Sanskrit of 1955 and onwards. I have edited them and seen them through the press by direction of the Syndicate. I am particularly obliged to Mm. Dr. P. V. Kane for going through the manuscript very carefully.

Shastri Hall,
Bombay.
15th March, 1954.

H. D. VELANKAR

SELECTIONS FROM
BRĀHMANAS AND UPANIṢADS

—:o:—



No. 1

ऐतरेय ब्राह्मण

(१. १३–१५)

सोमाय क्रीताय प्रोह्यमाणायानुब्रूहीत्याहाध्वर्युः। भद्रादभि श्रेयः प्रेहीत्यन्वाह। अयं वाव लोको भद्रस्तस्मादसावेव लोकः श्रेयान्। स्वर्गमेव तल्लोकं यजमानं गमयति। बृहस्पतिः पुरएता ते अस्त्विति। ब्रह्म वै बृहस्पतिर्ब्रह्मैवास्मा एतत् पुरोगवमकः। न वै ब्रह्मण्वद्रिष्यति। अथेमवस्य वर आ पृथिव्या इति। देवयजनं वै वरं पृथिव्यै। देवयजन एवैनं तदवसाययति। आरे शत्रून् कृणुहि सर्ववीर इति। द्विषन्तमेवास्मै तत् पाप्मानं भ्रातृव्यमपबाधते। अधरं पादयति। सोम यास्ते मयोभुवः (ऋ. सं १. ९१. ९–११) इति तृचं सौम्यं गायत्रमन्वाह। सोमे राजनि प्रोह्यमाणे स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति। सर्वे नन्दन्ति यशसागतेन (ऋ. १०. ७१. १०) इत्यन्वाह। यशो वै सोमो राजा। सर्वो ह एतेन क्रीयमाणेन नन्दति यश्च यज्ञे लप्स्यमानो भवति यश्च न। सभासाहेन सख्या सखाय इति। एष वै ब्राम्हणानां सभासाहः सखा यत्सोमो राजा। किल्बिषस्पृदिति। एष उ एव किल्बिषस्पृत्। यो वै भवति यः श्रेष्ठतामश्नुते स किल्बिषं भवति। तस्मादाहुर्माऽनुवोचो मा प्रचारीः किल्बिषं नु मा यातयन्निति। पितुषणिरिति। अन्नं वै पितु दक्षिणा वै

पितु। तामेनेन सनोति। अन्नसनिमवैनं तत् करोति। अरं हितो भवति वाजिनायेति। इन्द्रियं वै वीर्यं वाजिनम्। आजरसं हास्मै वाजिनं नापच्छिद्यते य एवं वेद। आगन्देवः (ऋ. सं. ४.५३.७) इत्यन्वाह। आगतो हि स तर्हि भवति। ऋतुभिर्वर्धतु क्षयमिति। ऋतवो वै सोमस्य राज्ञो राजभ्रातरो यथा मनुष्यस्य। तैरेवैनं तत् सहागमयति। दधातु नः सविता सुप्रजामिति। आशिषमाशास्ते। स नः क्षपाभिरहभिश्च जिन्वत्विति। अहानि वा अहानि रात्रयः क्षपाः। अहोरात्रैरेवास्मा एतामाशिषमाशास्ते। प्रजावन्तं रयिमस्मे समिन्वत्विति। आशिषमेवाशास्ते। या ते धामानि हविषा यजन्ति (ऋ.सं. १.९१.१९) इत्यन्वाह। ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीर इति। गवां न स्फावयिता प्रतारयितैधीत्येव तदाह। अवीरहा प्रचरा सोम दुर्यानिति। गृहा वै दुर्याः। बिभ्यति वै सोमाद्राज्ञ आयतो यजमानस्य गृहाः। स य एतामन्वाह शान्त्यैवैनं तच्छमयति। सोऽस्य शान्तो न प्रजां न पशून् हिनस्ति। इमां धियं शिक्षमाणस्य देव (ऋ.सं. ८.४२.३) इति वारुण्या परिदधाति। वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत् परिश्रितानि प्रपद्यते। स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति। शिक्षमाणस्य देवेति। शिक्षते वा एष यो यजते। ऋतुं दक्षं वरुण सं शिशाधीति। वीर्यं प्रज्ञानं वरुण सं शिशाधीत्येव तदाह। ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेमेति। यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौः वाचमेव तदारुह्य तया स्वर्गं लोकमभि संतरति। ता एता अष्टावन्वाह रूपसमृद्धाः। एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति। तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम्। तीव्रद्वादश संपद्यन्ते। द्वादश वै मासाः संवत्सरः। संवत्सरः प्रजापतिः। प्रजापत्यायतनाभिरेवाभी

राध्नोति य एवं वेद। त्रिः प्रथमां त्रिरुत्तमामन्वाह। यज्ञस्यैव तद् बर्सा नह्यति स्थेम्ने बलायाविस्रंसाय ॥ १३॥

अन्यतरोऽनड्वान् युक्तः स्यादन्यतरो विमुक्तः। अथ राजानमुपावहरेयुः। यदुभयोर्विमुक्तयोरुपावहरेयुः पितृदेवत्यं राजानं कुर्युः। यद्युक्तयोः, अयोगक्षेमः प्रजा विन्देत्। ताः प्रजाः परिप्लवेरन्। योऽनड्वान् विमुक्तस्तच्छालासदां प्रजानां रूपं यो युक्तस्तच्चक्रियाणाम्। ते ये युक्तेऽन्ये विमुक्तेऽन्य उपावहरन्त्युभावेव ते क्षेमयोगौ कल्पयन्ति। देवासुरा वा एषु लोकेषु समयतन्त। त एतस्यां प्राच्यां दिश्ययतन्त। तांस्ततोऽसुरा अजयन्। ते दक्षिणस्यां दिश्ययतन्त। तांस्ततोऽसुरा अजयन्। ते प्रतीच्यां दिश्ययतन्त। तांस्ततोऽसुरा अजयन्। त उदीच्यां दिश्ययतन्त। तांस्ततोऽसुरा अजयन्। त उदीच्यां प्राच्यां दिश्ययतन्त। ते ततो न पराजयन्त। सैषा दिगपराजिता। तस्मादेतस्यां दिशि यतेत यातयेद्वा। ईश्वरो ह अनृणाकर्तोः। ते देवा अब्रुवन्। अराजतया वै नो जयन्ति, राजानं करवामहा इति। तथेति। ते सोमं राजानमकुर्वन्। ते सोमेन राज्ञा सर्वा दिशोऽजयन्। एष वै सोमराजा यो यजते। प्राचि तिष्ठत्यादधति तेन प्राचीं दिशं जयति। तं दक्षिणा परिवहन्ति तेन दक्षिणां दिशं जयति। तं प्रत्यञ्चमावर्तयन्ति तेन प्रतीचीं दिशं जयति। तमुदीचस्तिष्ठत उपावहरन्ति तेनोदीचीं दिशं जयति। सोमेन राज्ञा सर्वा दिशो जयति य एवं वेद ॥ १४॥

हविरातिथ्यं निरुप्यते सोमे राजन्यागते। सोमो वै राजा यजमानस्य गृहानागच्छति। तस्मा एतद्धविरातिथ्यं निरुप्यते। तदातिथ्यस्यातिथ्यत्वम्। नवकपालो भवति। नव वै प्राणाः।

प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै। वैष्णवो भवति। विष्णुर्वै यज्ञः। स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति। सर्वाणि वाव च्छन्दांसि च पृष्ठानि च सोमं राजानं क्रीतमन्वायन्ति। यावन्तः खलु वै राजानमनुयन्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियते। अग्निं मन्थन्ति सोमे राजन्यागते। तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन्वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत् क्षदन्ते यदग्निं मन्थन्ति। अग्निर्हि देवानां पशुः ॥ १५ ॥

No. 2

तैत्तिरीयब्राह्मण

(३.२.८–९)

देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै। संवपामीत्याह। यथादेवतमेवैनानि संवपति। समापो अद्भिरग्मत समोषधयो रसेनेत्याह। आपो वा ओषधीर्जिन्वन्ति। ओषधयोऽपो जिन्वन्ति। अन्या वा एतासामन्या जिन्वन्ति। तस्मादेवमाह। सं रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमित्याह। आपो वै रेवतीः। पशवो जगतीः। ओषधयो मधुमतीः। आप ओषधीः पशून्। तानेवास्मा एकधा संसृज्य मधुमतः करोति। अद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यध्वमिति पर्याप्लावयति। यथा सुवृष्ट इमामनु विसृत्य आप ओषधीर्महयन्ति। तादृगेव तत्। जनयत्यै त्वा संयौमीत्याह। प्रजा एवैतेन दाधार। अग्नये त्वा अग्नीषोमाभ्यामित्याह व्यावृत्त्यै। मखस्य शिरोऽसीत्याह। यज्ञो वै मखः। तस्यैतच्छिरो यत् पुरोडाशः। तस्मादेवमाह ॥

धर्मोसि विश्वायुरित्याह। विश्वमेवायुर्यजमाने दधाति। उरु प्रथस्व उरु ते यज्ञपतिः प्रथतामित्याह। यजमानमेव प्रजया पशुभिः प्रथयति। त्वचं गृह्णीष्वेत्याह। सर्वमेवैनं सतनुं करोति। अथाप आनीय परिमार्ष्टि। मांस एव तत् त्वचं दधाति। तस्मात् त्वचा मांसं छन्नम्। घर्मो वा एषोऽशान्तः अर्धमासेऽर्धमासे प्रवृज्यते यत्पुरोडाशः। स ईश्वरो यजमानं शुचाप्रदहः। पर्यग्नि करोति। पशुमेवैनमकः शान्त्या अप्रदाहाय। त्रिः पर्यग्नि करोति। त्र्यावृद्धि यज्ञः। अथो

रक्षसामपहत्यै। अन्तरितं रक्षोऽन्तरिता अरातय इत्याह रक्षसामन्तर्हित्यै। पुरोडाशं वा अधिश्रितं रक्षांस्यजिघांसन्। दिवि नाको नामाग्नी रक्षोहा। स एवास्माद्रक्षांस्यपाहन्। देवस्त्वा सविता श्रपयत्वित्याह। सवितृप्रसूत एवैनं श्रपयति। वर्षिष्ठे अधि नाक इत्याह रक्षसामपहत्यै। अग्निस्ते तनुवं मातिधाग् इत्याहानतिदाहाय। अग्ने हव्यं रक्षस्वेत्याह गुप्त्यै ॥

अविदहन्तः श्रपयतेति वाचं विसृजते। यज्ञमव हवींष्यभिव्याहृत्य प्रतनुते। पुरोरुचमविदाहाय शृत्यै करोति। मस्तिष्को वै पुरोडाशः। तं यन्नाभिवासयेत्, आविर्मस्तिष्कः स्यात्। अभिवासयति। तस्माद् गुहा मस्तिष्कः। भस्मनाभिवासयति। तस्मान्मांसेनास्थि च्छन्नम्। वेदेनाभिवासयति। तस्मात् केशैः शिरश्छन्नम्। अखलतिभावुको भवति य एवं वेद। पशोर्वे प्रतिमा पुरोडाशः। स नायजुष्कमभिवास्यः। वृथैव स्यात्। ईश्वरा यजमानस्य पशवः प्रमेतोः। सं ब्रह्मणा पृच्यस्वेत्याह। प्राणा वै ब्रह्म प्राणाः पशवः प्राणैरेव पशून् संपृणक्ति। न प्रमायुका भवन्ति। यजमानो वै पुरोडाशः। प्रजाः पशवः पुरीषम्। यदेवमभिवासयति यजमानमेव प्रजया पशुभिः समर्धयति।

देवा वै हविर्भृत्वाब्रुवन्। कस्मिन्निदं म्रक्ष्यामह इति। सोऽग्निरब्रवीत्। मयि तनूः संनिधध्वम्। अहं वस्तं जनयिष्यामि यस्मिन् म्रक्ष्यध्व इति। ते देवा अग्नौ तनूः संन्यदधत। तस्मादाहुः। अग्निः सर्वा देवता इति। सोऽङ्गारेणापः अभ्यपातयत्। तत एकतोऽजायत। स द्वितीयमभ्यपातयत्। ततो द्वितोऽजायत। स तृतीयमभ्यपातयत्। ततस्त्रितोऽजायत। यदद्भ्योऽजायन्त तदाप्यानामाप्यत्वम्। यदात्मभ्योऽजायन्त तदात्म्यानामात्म्यत्वम्। ते देवा आप्येष्वमृजत। आप्या

अमृजत सूर्याभ्युदिते। सूर्याभ्युदितः सूर्याभिनिम्रुक्ते। सूर्याभिनिम्रुक्तः कुनखिनि। कुनखी श्यावदति। श्यावदन्नग्रदिधिषौ। अग्रदिधिषुः परिवित्ते। परिवित्तो वीरहणि। वीरहा ब्रह्महणि। तद् ब्रह्महणं नात्यच्यवत। अन्तर्वेदि निनयति अवरुध्द्यै। उल्मुकेनाभिगृह्णाति शृतत्वाय। शृतकामा इव हि देवाः॥८॥ इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे तृतीयाष्टके द्वितीयाध्यायेऽष्टमोनुवाकः ॥८॥

देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते प्रसूत्यै। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै। आदद इन्द्रस्य बाहुरसि दक्षिण इत्याह। इन्द्रियमेव यजमाने दधाति। सहस्रभृष्टिः शततेजा इत्याह। रूपमेवास्यैतन्महिमानं व्याचष्टे। वायुरसि तिग्मतेजा इत्याह। तेजो वै वायुः। तेज एवास्मिन्दधाति। विषाद्वै नामासुर आसीत्। सोऽबिभेत्। यज्ञेन मा देवा अभिभविष्यन्तीति। स पृथिवीमभ्यवमीत्। सा अमेध्याभवत्। अथो यदिन्द्रो वृत्रमहन्। तस्य लोहितं पृथिवीमनु व्यधावत्। सा अमेध्याभवत्। पृथिवि देवयजनीत्याह। मेध्यामेवैनां देवयजनीं करोति। ओषध्यास्ते मूलं मा हिंसिषमित्याह। ओषधीनामहिंसायै। व्रजं गच्छ गोस्थानमित्याह। छन्दांसि वै व्रजो गोस्थानः। छन्दांस्येवास्मै व्रजं गोस्थानं करोति। वर्षतु ते द्यौरित्याह। वृष्टिर्वै द्यौः। वृष्टिमेवावरुन्धे।

बधान देव सवितः परमस्यां परावतीत्याह। द्वौ वाव पुरुषौ। यं चैव द्वेष्टि यश्चैनं द्वेष्टि। तावुभौ बध्नाति परमस्यां परावति शतेन

पाशैः। योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगित्याहा-निम्रुक्त्यै। अररुर्वै नामासुर आसीत्। स पृथिव्यामुपम्लुतोऽशयत्। तं देवा अपहतोऽररुः पृथिव्या इति पृथिव्या अपाघ्नन्। भ्रातृव्यो वा अररुः। अपहतोऽररुः पृथिव्या इति यदाह भ्रातृव्यमेव पृथिव्या अपहन्ति। तेऽमन्यन्त। दिवं वा अयमितः पतिष्यतीति। तमररुस्ते दिवं मा स्कानिति दिवः पर्यबाधन्त। भ्रातृव्यो वा अररुः। अररुस्ते दिवं मा स्कानिति यदाह भ्रातृव्यमेव दिवः परिबाधते। स्तम्बयजुर्हरति। पृथिव्या एव भ्रातृव्यमपहन्ति। द्वितीयं हरति। अन्तरिक्षादेवैनमपहन्ति। तृतीयं हरति। दिव एवैनमपहन्ति। तूष्णीं चतुर्थं हरति। अपरिमितादेवैनमपहन्ति। असुराणां वा इयमग्र आसीत्। यावदासीनः परापश्यति तावद् देवानाम्। ते देवा अब्रुवन्। अस्त्वेव नोऽस्यामपीति। क्यं नो दास्यथेति। यावत्स्वयं परिगृह्णीथेति। ते वसवस्त्वेति दक्षिणतः पर्यगृह्णन्। रुद्रास्त्वेति पश्चात्। आदित्या-स्त्वेत्युत्तरतः। तेऽग्निना प्राञ्चोऽजयन्। वसुभिर्दक्षिणाः। रुद्रैः प्रत्यञ्चः। आदित्यैरुदञ्चः। यस्यैवं विदुषो वेदिं परिगृह्णन्ति भवत्यात्मना परास्य भ्रातृव्यो भवति॥

देवस्य सवितुः सव इत्याह प्रसूत्यै। कर्म कृण्वन्ति वेधस इत्याह। इषितं हि कर्म क्रियते। पृथिव्यै मेध्यं चामेध्यं च व्युदक्रामताम्। प्राचीनमुदीचीनं मेध्यम्। प्रतीचीनं दक्षिणा अमेध्यम्। प्राचीमुदीचीं प्रवणां करोति। मेध्यामेवैनां देवयजनीं करोति। प्राञ्चौ वेद्यं-सावुन्नयति। आहवनीयस्य परिगृहीत्यै। प्रतीची श्रोणी। गार्हपत्यस्य परिगृहीत्यै। अथो मिथुनत्वाय। उद्धन्ति। यदेवास्या अमेध्यं तदप-हन्ति। उद्धन्ति। तस्मादोषधयः पराभवन्ति। मूलं छिनत्ति। भ्रातृव्यस्यैव मूलं छिनत्ति। मूलं वा अतितिष्ठद्रक्षांस्यनूत्पिपते। यद्धस्तेन च्छिन्द्यात् कुनखिनीः प्रजाः स्युः। स्फ्येन च्छिनत्ति। वज्रो

वै स्फ्यः। वज्रेणैव यज्ञाद्रक्षांस्यपहन्ति। पितृदेवत्यातिखाता। इयतीं खनति। प्रजापतिना यज्ञमुखेन संमिताम्। वेदिर्देवेभ्यो निलायत। तां चतुरङ्गुलेऽन्वविन्दन् तस्माच्चतुरङ्गुलं खेया। चतुरङ्गुलं खनति। चतुरङ्गुले ह्योषधयः प्रतितिष्ठन्ति। आ प्रतिष्ठायै खनति। यजमानमेव प्रतिष्ठां गमयति। दक्षिणतो वर्षीयसीं करोति। देवयजनस्यैव रूपमकः।

पुरीषवतीं करोति प्रजा वै पशवः पुरीषम्। प्रजयैवैनं पशुभिः पुरीषवन्तं करोति। उत्तरं परिग्राहं परिगृह्णाति। एतावती वै पृथिवी यावती वेदिः। तस्या एतावत एव भ्रातृव्यं निर्भज्य आत्मन उत्तरं परिग्राहं परिगृह्णाति। ऋतमसि, ऋतसदनमसि, ऋतश्रीरसीत्याह। यथायजुरेवैतत्। क्रूरमिव वा एतत् करोति यद्वेदिं करोति। धा असि स्वधा असीति योयुप्यते शान्त्यै। उर्वी चासि वस्वी चासीत्याह। उर्वीमेवैनां वस्वीं करोति। पुरा क्रूरस्य विसृपो विरप्शिन्नित्याह मेध्यत्वाय। उदादाय पृथिवीं जीरदानुर्यामैरयञ्चन्द्रमसि स्वधाभिरित्याह। यदेवास्या अमेध्यं तदपहत्य मेध्यां देवयजनीं कृत्वा यददश्चन्द्रमसि मेध्यं तदस्यामेरयति। तां धीरासो अनुदृश्य यजन्त इत्याह अनुख्यातै। प्रोक्षणीरासादय। इध्मार्बर्हिरुपसादय। स्रुवं च स्रुचश्च संमृड्ढि। पत्नीं संनह्य। आज्येनोदेहीत्याह अनुपूर्वतायै। प्रोक्षणीरासादयति। आपो वै रक्षोघ्नीः। रक्षसामपहत्यै। स्फ्यस्य वर्त्मन्त्सादयति। यज्ञस्य संतत्यै। उवाच हासितो देवलः। एतावतीर्वा अमुष्मिल्लोक आप आसन् यावतीः प्रोक्षणीरिति। तस्माद् बह्वीरासाद्याः। स्फ्यमुदस्यन् यं द्विष्यात् तं ध्यायेत्। शुचैवैनमर्पयति ॥ ९ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे तृतीयाष्टके द्वितीयाध्याये नवमोऽनुवाकः ॥ ९ ॥

No. 3

(१) शतपथब्राह्मण

(११.५.४. १–१८)

ब्रह्मचर्यमागामित्याह। ब्रह्मण एवैतदात्मानं निवेदयति। ब्रह्मचार्यसानीत्याह। ब्रह्मण एवैतदात्मानं परिददाति। अथैनमाह। को नामासीति। प्रजाप्रतिर्वै कः। प्राजापत्यमेवैनं तत्कृत्वोपनयते ॥ १ ॥

अथास्य हस्तं गृह्णाति। इन्द्रस्य ब्रह्मचार्यसि। अग्निराचार्यस्तव। अहमाचार्यस्तवासाविति। एते वै श्रेष्ठे बलिष्ठे देवते। एताभ्यामेवैनं श्रेष्ठाभ्यां बलिष्ठाभ्यां देवताभ्यां परिददाति। तथा हास्य ब्रह्मचारी न कांचनार्तिमार्च्छति। न स य एवं वेद ॥ २ ॥

अथैनं भूतेभ्यः परिददाति। प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामीति। एते वै श्रेष्ठे वर्षिष्ठे देवते। एताभ्यामेवैनं श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति। तथा हास्य ब्रह्मचारी न कांचनार्तिमार्च्छति। न स य एवं वेद ॥ ३ ॥

अद्भ्यस्त्वौषधीभ्यः परिददामीति। तदेनमद्भ्यश्चौषधिभ्यश्च परिददाति। द्यावापृथिवीभ्यां त्वा परिददामीति। तदेनमाभ्यां द्यावापृथिवीभ्यां परिददाति ययोरिदं सर्वमधि। विश्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इति। तदेनं सर्वेभ्यो भूतेभ्यः परिददात्यरिष्ट्यै। तथा हास्य ब्रह्मचारी न कांचनार्तिमार्च्छति। न स य एवं वेद ॥ ४ ॥

ब्रह्मचार्यसीत्याह। ब्रह्मण एवैनं तत् परिददाति। अपोऽशानेति। अमृतं वा आपः। अमृतमशानेत्येवैनं तदाह। कर्म कुर्विति। वीर्यं वै

कर्म। वीर्यं कुर्वित्येवैनं तदाह। समिधमाधेहीति। समिन्त्स्वात्मानं तेजसा ब्रह्मवर्चसेनेत्येवैनं तदाह। मा सुषुप्था इति। मा मृथा इत्येवैनं तदाह। अपोऽशानेति। अमृतं वा आपः। अमृतमशानेत्येवैनं तदाह। तदेनमुभयतोऽमृतेन परिगृह्णाति। तथा हास्य ब्रह्मचारी न कांचनार्तिमार्च्छति। न स य एवं वेद ॥ ५ ॥

अथास्मै सावित्रीमन्वाह। तां ह स्मैतां पुरा संवत्सरेऽन्वाहुः। संवत्सरसंमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ ६ ॥

अथ षट्सु मासेषु। षड् वा ऋतवः संवत्सरस्य। सवंत्सरसंमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ ७ ॥

अथ चतुर्विंशत्यहे। चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः। संवत्सर-संमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ ८ ॥

अथ द्वादशाहे। द्वादश वै मासाः संवत्सरस्य। संवत्सरसंमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ ९ ॥

अथ षडहे। षड् वा ऋतवः संवत्सरस्य। संवत्सरसंमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ १० ॥

अथ त्र्यहे। त्रयो वा ऋतवः संवत्सरस्य। संवत्सरसंमिता वै गर्भाः प्रजायन्ते। जात एवास्मिंस्तद्वाचं दध्म इति ॥ ११ ॥

तदपि श्लोकं गायन्ति।

आचार्यो गर्भीभवति हस्तमाधाय दक्षिणम्।
तृतीयस्यां स जायते सावित्र्या सह ब्राह्मणः। इति।

सद्यो ह त्वाव ब्राह्मणायानुब्रूयात्। आग्नेयो वै ब्राह्मणः। सद्यो वा अग्निर्जायते। तस्मात् सद्य एव ब्राह्मणायानुब्रूयात् ॥ १२॥

तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः। वाग् वा अनुष्टुप्। तदस्मिन् वाचं दध्म इति। न तथा कुर्यात्। यो हैनं तत्र ब्रूयादा न्वा अयमस्य वाचमदित मूको भविष्यतीति, ईश्वरो ह तथैव स्यात्। तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात् ॥ १३॥

अथ हैके दक्षिणतः तिष्ठते वासीनाय वान्वाहुः। न तथा कुर्यात्। यो हैनं तत्र ब्रूयाद् बुल्बं न्वा अयमिममजीजनत बुल्बो भविष्यतीति, ईश्वरो ह तथैव स्यात्। तस्मात् पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात् ॥ १४॥

तां वै पच्छोऽन्वाह। त्रयो वै प्राणाः। प्राण उदानो व्यानः। तानेवास्मिंस्तद्दधाति। अथार्धर्चशः। द्वा वा इमौ प्राणौ प्राणोदानावेव। प्राणोदानावेवास्मिंस्तद्दधाति। अथ कृत्स्नाम्। एको वा अयं प्राणः कृत्स्न एव। प्राणमेवास्मिंस्तत्कृत्स्नं दधाति ॥ १५॥

तदाहुः। न ब्राह्मणं ब्रह्मचर्यमुपनीय मिथुनं चरेत्। गर्भो वा एष भवति यो ब्रह्मचर्यमुपैति। नेदिमं ब्राह्मणं विषिक्ताद्रेतसो जनयानीति ॥ १६॥

तदु वा आहुः काममेव चरेत्। द्वय्यो वा इमाः प्रजाः दैव्यश्चैव मानुष्यश्च। ता वा इमा मानुष्यः प्रजाः प्रजननात् प्रजायन्ते। छन्दांसि वै दैव्यः प्रजाः। तानि मुखतो जनयते। तत एतं जनयते। तस्मादु काममेव चरेत् ॥ १७॥

तदाहुः। न ब्रह्मचारी सन्मध्वश्नीयात्। ओषधीनां वा एष परमो रसो यन्मधु। नेदन्नाद्यस्यान्तं गच्छानीति। अथ ह स्माह श्वेतकेतुरारुणेयो ब्रह्मचारी सन् मध्वश्नन्। त्रय्यै वा एतद्विद्यायै शिष्टं

यन्मधु। स तु रसो यस्येदृक् शिष्टमिति। यथा वा ऋचं वा यर्जुवा साम वाभिव्याहरेत् तादृक् तद्य एवं विद्वान् ब्रह्मचारी सन्मध्वश्नाति। तस्मादु काममेवाश्नीयात् ॥ १८॥

(२) शतपथब्राह्मण

(११.५.७. १–१०)

अथातः स्वाध्यायप्रशंसा। प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोऽहरहरर्थान्त्साधयते। सुखं स्वपिति परमचिकित्सक आत्मनो भवति। इन्द्रियसंयमश्चैकारामता च प्रज्ञावृद्धिर्यशो लोकपक्तिः। प्रज्ञा वर्धमाना चतुरो धर्मान् ब्राह्मणमभिनिष्पादयति---ब्राह्मण्यं प्रतिरूपचर्यां यशो लोकपक्तिम्। लोकः पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्ति-अर्चया च दानेन चाज्येयतया चावध्यतया च ॥ १॥

ये ह वै के च श्रमा इमे द्यावापृथिवी अन्तरेण स्वाध्यायो हैव तेषां परमता काष्ठा य एवं विद्वान्त्स्वाध्यायमधीते। तस्मात्स्वाध्यायोऽध्येतव्यः ॥ २॥

यद् यद्ध वा अयं छन्दसः स्वाध्यायमधीते तेन तेन हैवास्य यज्ञक्रतुनेष्टं भवति य एवं विद्वान्त्स्वाध्यायमधीते। तस्मात् स्वाध्यायोऽध्येतव्यः ॥ ३॥

यदि ह वा अप्यभ्यक्तः, अलंकृतः, सुहितः, सुखे शयने शयानः स्वाध्यायमधीते आ हैव स नखाग्रेभ्यस्तप्यते य एवं विद्वान्त्स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः ॥ ४॥

मधु ह वा ऋचः। घृतं ह सामानि। अमृतं यजूंषि। यद्ध वा अयं वाकोवाक्यमधीते क्षीरोदनमांसोदनौ हैव तौ ॥ ५ ॥

मधुना ह वा एष देवांस्तर्पयति य एवं विद्वान् ऋचोऽहरहः स्वाध्यायमधीते। त एनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥ ६ ॥

घृतेन ह वा एष देवांस्तर्पयति य एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते त एनं तृप्तास्तर्पयन्ति सर्वैः कामै सर्वैर्भोगैः ॥ ७ ॥

अमृतेन ह वा एष देवांस्तर्पयति य एवं विद्वान् यजूंष्यहरहः स्वाध्यायमधीते। त एनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥ ८ ॥

क्षीरोदनमांसौदनाभ्यां ह वा एष देवांस्तर्पयति य एवं विद्वान् वाकोवाक्यमितिहासपुराणमित्यहरहः स्वाध्यायमधीते त एनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥ ९ ॥

यन्ति वा आपः। एत्यादित्य एति चन्द्रमा यन्ति नक्षत्राणि। यथा ह वा एता देवता नेयुर्न कुर्युरेवं हैव तदहर्ब्राह्मणो भवति यदहः स्वाध्यायं नाधीते। तस्मात्स्वाध्यायोऽध्येतव्यः। तस्मादपि ऋचं वा यजुर्वा साम वा गाथां वा कुंव्यां वाभिव्याहरेत् व्रतस्याव्यवच्छेदाय ॥ १० ॥

No. 4

मुण्डकोपनिषत्।

१.१

ब्रह्मा देवानां प्रथमः संबभूव
विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठा-
मथर्वाय ज्येष्ठपुत्राय प्राह ॥ १॥

अथर्वणे यां प्रवदेत ब्रह्मा
अथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।
स भारद्वाजाय सत्यवहाय प्राह
भारद्वाजोऽङ्गिरसे परावराम् ॥ २॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ ३॥ तस्मै स होवाच। द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४॥ तत्रापरा। ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥ ५॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्
अचक्षुःश्रोत्रं तदपाणिपादम्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥ ६॥

यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः संभवन्ति ।
यथा सतः पुरुषात्केशलोमानि
तथाक्षरात्संभवतीह विश्वम् ॥ ७॥

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ ८॥

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ ९ ॥

इति मुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः ॥ १॥

१.२

तदेतत्सत्यम् ।

मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्
तानि त्रेतायां बहुधा संततानि ।
तान्याचरथ नियतं सत्यकामा
एष वः पन्थाः सुकृतस्य लोके ॥ १॥

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥ २॥

यस्याग्निहोत्रमदर्शमपौर्णमासम्
अचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।
अहुतमवैश्वदेवमविधिना हुतम्
आसप्तमांस्तस्य लोकान् हिनस्ति ॥ ३॥

काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥४॥

एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो ह्याददायन् ।
तं नयन्त्येताः सूर्यस्य रश्मयो
यत्र देवानां पतिरेकोऽधिवासः ॥५॥

एह्येहीति तमाहुतयः सुवर्चसः
सूर्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥७॥

प्लवा ह्येते अदृढा यज्ञरूपा
अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा
जरामृत्युं ते पुनरेवापि यन्ति ॥८॥

अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितं मन्यमानाः ।
जङ्घन्यमानाः परियन्ति मूढा
अन्धेनैव नीयमाना यथान्धाः ॥९॥

अविद्यायां बहुधा वर्तमाना
वयं कृतार्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागात्
तेनातुराः क्षीणलोकाश्च्यवन्ते ॥१०॥

इष्टापूर्तं मन्यमाना वरिष्ठं
नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा
इमं लोकं हीनतरं वा विशन्ति ॥ ११॥

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ १२॥

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १३॥

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १४॥

इति मुण्डकोपनिषदि प्रथममुण्डके द्वितीयः खण्डः ॥ १.२॥

२.१

तदेतत्सत्यम् ।
यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते विश्वरूपाः ।
तथाक्षराद्विविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति ॥ १॥

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥२॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥३॥

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ
दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥४॥

तस्मादग्निः समिधो यस्य सूर्यः
सोमात्पर्जन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् संप्रसूताः ॥५॥

तस्मादृचः साम यजूंषि दीक्षा
यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः
सोमो यत्र पवते यत्र सूर्यः ॥६॥

तस्माच्च देवा बहुधा संप्रसूताः
साध्या मनुष्याः पशवो वयांसि ।
प्राणापानौ व्रीहियवौ तपश्च
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥७॥

सप्त प्राणाः प्रभवन्ति तस्मात्
सप्तार्चिषः समिधः सप्त होमाः ।
सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त ॥८॥

अतः समुद्रा गिरयश्च सर्वे
अस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च सर्वा ओषधयो रसश्च
येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥ ९॥

पुरुष एवेदं विश्वं कर्म
तपो ब्रह्म परामृतम् ।
एतद्यो वेद निहितं गुहायां
सोऽविद्याग्रन्थि विकिरतीह सोम्य ॥ १०॥

इति मुण्डकोपनिषदि द्वितीयमुण्डके प्रथमः खण्डः ॥ २.१ ॥

२.२

आविः संनिहितं गुहाचरं नाम
महत्पदमत्रैतत् समर्पितम् ।
एजत्प्राणन्निमिषच्च यदेतज्जानथ
सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ॥ १॥

यदर्चिमद्यदणुभ्योऽणु च
यस्मिँल्लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदुः वाङ्मनः
तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥ २॥

धनुर्गृहीत्वौपनिषदं महास्त्रं
शरं ह्युपासानिशितं संदधीत ।
आयम्य तद्भावगतेन चेतसा
लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ३॥

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ४॥

यस्मिन् द्यौः पृथिवी चान्तरिक्षम्
ओतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानम्
अन्या वाचो विमुञ्चथामृतस्यैष सेतुः ॥ ५॥

अरा इव रथनाभौ संहता यत्र नाड्यः
स एषोन्तश्चरते बहुधा जायमानः ।
ओमित्येवं ध्यायथ आत्मानं
स्वस्ति वः पाराय तमसः परस्तात् ॥ ६॥

यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि ।
दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ॥ ७॥

मनोमयः प्राणशरीरनेता
प्रतिष्ठितोऽन्ने हृदयं संनिधाय ।
तद्विज्ञानेन परिपश्यन्ति धीरा
आनन्दरूपममृतं यद्विभाति ॥ ८॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ९॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः॥ १०॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥ ११॥

ब्रह्मैवेदममृतं पुरस्ताद्
ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं प्रसृतं
ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ १२॥

इति मुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयः खण्डः ॥ २.२॥

३.१

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति ॥ १॥

समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशम्
अस्य महिमानमिति वीतशोकः ॥ २॥

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥ ३॥

प्राणो ह्येष यः सर्वभूतैर्विभाति
विजानन्विद्वान् भवते नातिवादी ।
आत्मक्रीड आत्मरतिः क्रियावान्
एष ब्रह्मविदां वरिष्ठः ॥ ४॥

सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग्-ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥५॥

सत्यमेव जयते नानृतं
सत्येन पन्था विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामा
यत्र तत्सत्यस्य परमं निधानम् ॥६॥

बृहच्च तद्दिव्यमचिन्त्यरूपं
सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात् सूदूरे तदिहान्तिके च
पश्यत्स्विहैव निहितं गुहायाम् ॥७॥

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्वस्
ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥८॥

एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन्प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्वमोतं प्रजानां
यस्मिन्विशुद्धे विभवत्येष आत्मा ॥९॥

यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामांस्
तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥१०॥

इति मुण्डकोपनिषदि तृतीयमुण्डके प्रथमः खण्डः ॥३.१॥

३.२

स वेदैतत् परमं ब्रह्म धाम
यत्र विश्वं निहितं भाति शुभ्रम् ।
उपासते पुरुषं ये ह्यकामास्
ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १॥

कामान् यः कामयते मन्यमानः
स कामभिर्जायते तत्र तत्र ।
पर्याप्तकामस्य कृतात्मनस्तु
इहैव सर्वे प्रविलीयन्ति कामाः ॥ २॥

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्
तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ ३॥

नायमात्मा बलहीनेन लभ्यो
न च प्रमादात् तपसो वाप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वांस्
तस्यैष आत्मा विशते ब्रह्मधाम ॥ ४॥

संप्राप्यैनमृषयो ज्ञानतृप्ताः
कृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीरा
युक्तात्मानः सर्वमेवाविशन्ति ॥ ५॥

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ॥ ६॥

गता: कला: पञ्चदश प्रतिष्ठा
देवाश्च सर्वे प्रति देवतासु ।
कर्माणि विज्ञानमयश्च आत्मा
परेऽव्यये सर्व एकीभवन्ति ॥ ७॥

यथा नद्य: स्यन्दमाना: समुद्रे
अस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्त:
परात् परं पुरुषमुपैति दिव्यम् ॥ ८॥

स यो ह वै तत्परमं ब्रह्म वेद
ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति ।
तरति शोकं तरति पाप्मानं
गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९॥

तदेतदृचाभ्युक्तम्–
क्रियावन्त: श्रोत्रिया ब्रह्मनिष्ठा:
स्वयं जुह्वत एकर्षिं श्रद्धयन्त: ।
तेषामेवैतां ब्रह्मविद्यां वदेत
शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १०॥

तदेतत् सत्यमृषिरङ्गिरा: पुरोवाच नैतदचीर्णव्रतोऽधीते ।
नम: परमऋषिभ्यो नम: परमऋषिभ्य: ॥

इति मुण्डकोपनिषदि तृतीयमुण्डके द्वितीय: खण्ड: ॥ ३.२॥
इत्यथर्ववेदीया मुण्डकोपनिषत् समाप्ता ॥

———

No. 5

श्वेताश्वतरोपनिषत् ।

१.

ब्रह्मवादिनो वदन्ति ।

किं कारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च संप्रतिष्ठाः ।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥ १॥

कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावाद्
आत्माप्यनीशः सुखदुःखहेतोः ॥ २॥

ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम् ।
यः कारणानि निखिलानि तानि
कालात्मयुक्तान्यधितिष्ठत्येकः ॥ ३॥

तमेकनेमिं त्रिवृतं षोडशान्तं
शतार्धारं विंशतिप्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं
त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥ ४॥

पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्रां
पञ्चप्राणोर्मिं पञ्चबुध्यादिमूलाम् ।
पञ्चावर्तां पञ्चदुःखौघवेगां
पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥ ५॥

सर्वाजीवे सर्वसंस्थे बृहन्ते
तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।
पृथगात्मानं प्रेरितारं च मत्वा
जुष्टस्ततस्तेनामृतत्वमेति ॥ ६ ॥

उद्गीतमेतत्परमं तु ब्रह्म
तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च ।
अत्रान्तरं ब्रह्मविदो विदित्वा
लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥ ७ ॥

संयुक्तमेतत् क्षरमक्षरं च
व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बध्यते भोक्तृभावाज्
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ ८ ॥

ज्ञाज्ञौ द्वावजावीशनीशा-
वजा ह्येका भोक्तृभोगार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता
त्रयं यदा विन्दते ब्रह्ममेतत् ॥ ९ ॥

क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देव एकः ।
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्
भूयश्चान्ते विश्वमायानिवृत्तिः ॥ १० ॥

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवल आप्तकामः ॥ ११ ॥

एतज्ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किंचित् ।
भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥ १२॥

वह्नेर्यथा योनिगतस्य मूर्तिर्
न दृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्यस्
तद्वोभयं वै प्रणवेन देहे ॥ १३॥

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ १४॥

तिलेषु तैलं दधिनीव सर्पिर्
आपः स्त्रोतःस्वरणीषु चाग्निः ।
एवमात्मात्मनि गृह्यतेऽसौ
सत्येनैनं तपसा योऽनुपश्यति ॥ १५॥

सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्या तपोमूलं तद्ब्रह्मोपनिषत्परम् ॥ १६॥

तद्ब्रह्मोपनिषत्परम् । इति ।
इति श्वेताश्वतरोपनिषत्सु प्रथमोऽध्यायः ॥ १॥

२.

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १॥

युक्तेन मनसा वयं देवस्य सवितुः सवे ।
सुवर्गेयाय शक्त्या ॥ २॥

युक्त्वाय मनसा देवान् सुवर्यतो धिया वयम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥

युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्
मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्
विश्लोकयन्ति पथ्येव सूरेः ।
शृण्वन्ति विश्वे अमृतस्य पुत्रा
आ ये धामानि दिव्यानि तस्थुः ॥ ५ ॥

अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते ।
सोमो यत्रातिरिच्यते तत्र संजायते मनः ॥ ६ ॥

सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम् ।
तत्र योनिं कृणवसे न हि ते पूर्तमक्षिपत् ॥ ७ ॥

त्रिरुन्नतं स्थाप्य समं शरीरं
हृदीन्द्रियाणि मनसा संनिवेश्य ।
ब्रह्मोडुपेन प्रतरेत विद्वान्
स्त्रोतांसि सर्वाणि भयावहानि ॥ ८ ॥

प्राणान्प्रपीडयेह संयुक्तचेष्टः
क्षीणे प्राणे नासिकयोच्छ्वसीत ।
दुष्टाश्वयुक्तमिव वाहमेनं
विद्वान्मनो धारयेताप्रमत्तः ॥ ९ ॥

समे शुचौ शर्करावह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः ।
मनोनुकूले न तु चक्षुपीडने
गुहानिवाताश्रयणे प्रयोजयेत् ॥ १० ॥

नीहारधूमार्कानलानिलानां
खद्योतविद्युत्स्फटिकशशीनाम् ।
एतानि रूपाणि पुरःसराणि
ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ ११ ॥

पृथिव्यप्तेजोनिलखे समुत्थिते
पञ्चात्मके योगगुणे प्रवृत्ते ।
न तस्य रोगो न जरा न मृत्युः
प्राप्तस्य योगाग्निमयं शरीरम् ॥ १२ ॥

लघुत्वमारोग्यमलोलुपत्वं
वर्णप्रसादं स्वरसौष्ठवं च ।
गन्धः शुभो मूत्रपुरीषमल्पं
योगप्रवृत्तिं प्रथमां वदन्ति ॥ १३ ॥

यथैव बिम्बं मृदयोपलिप्तं
तेजोमयं भ्राजते तत्सुधान्तम् ।
तद्वात्मतत्त्वं प्रसमीक्ष्य देही
एकः कृतार्थो भवते वीतशोकः ॥ १४ ॥

यदात्मतत्त्वेन तु ब्रह्मतत्त्वं
दीपोपमेनेह युक्तः प्रपश्यत् ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १५ ॥

५१। BVBSSMV

एष ह देवः प्रदिशोऽनु सर्वाः
पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः
प्रत्यङ्[1] जनास्तिष्ठति सर्वतोमुखः ॥ १६॥

यो देवोऽग्नौ योऽप्सु
यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु
तस्मै देवाय नमो नमः ॥ १७॥

इति श्वेताश्वतरोपनिषत्सु द्वितीयोऽध्यायः ॥ २॥

३.

य एको जालवानीशत ईशनीभिः
सर्वाँल्लोकानीशत ईशनीभिः ।
य एवैक उद्भवे संभवे च
य एतद्विदुरमृतास्ते भवन्ति ॥ १॥

एको हि रुद्रो न द्वितीयाय तस्थे
य इमाँल्लोकानीशत ईशनीभिः ।
प्रत्यङ् जनास्तिष्ठति संचुकोचान्तकाले
संसृज्य विश्वा भुवनानि गोपाः ॥ २॥

विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्
द्यावाभूमी जनयन् देव एकः ॥ ३॥

---

१ प्रत्यग् जनाः Com. प्रत्यङ् जनांस्तिष्ठति N.S.P. ed.

यो देवानां प्रभवश्चोद्भवश्च
विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं
स नो बुध्द्या शुभया संयुनक्तु ॥४॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तनुवा शतमया गिरिशन्ताभिचाकशीहि ॥५॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥६॥

ततः परं ब्रह्म परं बृहन्तं
यथानिकायं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारम्
ईशं तं ज्ञात्वामृता भवन्ति ॥७॥

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥८॥

यस्मात्परं नापरमस्ति किंचिद्
यस्मान्नाणीयो न ज्यायोऽस्ति किंचित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्
तेनेदं पूर्णं पुरुषेण सर्वम् ॥९॥

ततो यदुत्तरतरं तदरूपमनामयम् ।
य एतद्विदुरमृतास्ते भवन्ति
अथेतरे दुःखमेवापियन्ति ॥१०॥

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः ॥ ११ ॥

महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः ।
सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः ॥ १२ ॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषा मनसाभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥ १३ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम् ॥ १४ ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १५ ॥

सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् ॥ १७ ॥

नवद्वारे पुरे देही हंसो लेलायते बहिः ।
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥ १८ ॥

अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम् ॥ १९ ॥

अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥ २० ॥

वेदाहमेतमजरं पुराणं
सर्वात्मानं सर्वगतं विभुत्वात् ।
जन्मनिरोधं प्रवदन्ति यस्य
ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥ २१ ॥

इति श्वेतांश्वतरोपनिषत्सु तृतीयोध्यायः ॥ ३ ॥

४.

य एकोऽवर्णो बहुधा शक्तियोगाद्
वर्णाननेकान् निहितार्थो दधाति ।
वि चैति चान्ते विश्वमादौ स देवः
स नो बुध्द्या शुभया संयुनक्तु ॥ १ ॥

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः ॥ २ ॥

त्वं स्त्री त्वं पुमानसि
त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि
त्वं जातो भवसि विश्वतोमुखः ॥ ३ ॥

नीलः पतङ्गो हरितो लोहिताक्षस्
तडिद्गर्भ ऋतवः समुद्राः ।
अनादिमत्त्वं विभुत्वेन वर्तसे
यतो जातानि भुवनानि विश्वा ॥ ४ ॥

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनु शेते
जहात्येनां भुक्तभोगामजोन्यः ॥५॥

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजात ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति ॥६॥

समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशम्
अस्य महिमानमिति वीतशोकः ॥७॥

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति
य इत् तद्विदुस्त इमे समासते ॥८॥

छन्दांसि यज्ञाः क्रतवो व्रतानि
भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया संनिरुद्धः ॥९॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥१०॥

यो योनिं योनिमधितिष्ठत्येको
यस्मिन्निदं सं च वि चैति सर्वम् ।
तमीशानं वरदं देवमीड्यं
निचाय्येमां शान्तिमत्यन्तमेति ॥ ११॥

यो देवानां प्रभवश्चोद्भवश्च
विश्वाधिपो रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानं
स नो बुध्द्या शुभया संयुनक्तु ॥ १२॥

यो देवानामधिपो यस्मिल्लोका अधिश्रिताः ।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ॥ १३॥

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ १४॥

स एव काले भुवनस्य गोप्ता
विश्वाधिपः सर्वभूतेषु गूढः ।
यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च
तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥ १५॥

घृतात्परं मण्डमिवातिसूक्ष्मं
ज्ञात्वा शिवं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १६॥

एष देवो विश्वकर्मा महात्मा
सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषा मनसाभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥ १७ ॥

यदा तमस्तन्न दिवा न रात्रिर्
न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी ॥ १८ ॥

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ॥ १९ ॥

न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चनैनम् ।
हृदा हृदिस्थं मनसा य एनम्
एवं विदुरमृतास्ते भवन्ति ॥ २० ॥

अजात इत्येवं कश्चिद्भीरुः प्रपद्यते ।
रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥ २१ ॥

मा नस्तोके तनये मा न आयुषि
मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्
हविष्मन्तः सदमित् त्वा हवामहे ॥ २२ ॥

इति श्वेताश्वतरोपनिषत्सु चतुर्थोऽध्यायः ॥ ४ ॥

५.

द्वे अक्षरे ब्रह्मपरे त्वनन्ते
विद्याविद्ये निहिते यत्र गूढे ।
क्षरं त्वविद्या ह्यमृतं तु विद्या
विद्याविद्ये ईशते यस्तु सोऽन्यः ॥ १ ॥

यो योनिं योनिमधितिष्ठत्येको
विश्वानि रूपाणि योनीश्च सर्वाः ।
ऋषिं प्रसूतं कपिलं यस्तमग्रे
ज्ञानैर्बिभर्ति जायमानं च पश्येत् ॥ २ ॥

एकैकं जालं बहुधा विकुर्व—
न्नस्मिन् क्षेत्रे संहरत्येष देवः ।
भूयः सृष्ट्वा पतयस्तथेशः
सर्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥

सर्वा दिश उर्ध्वमधश्च तिर्यक्
प्रकाशयन् भ्राजते यद्वनड्वान् ।
एवं स देवो भगवान् वरेण्यो
योनिस्वभावानधितिष्ठत्येकः ॥ ४ ॥

यच्च स्वभावं पचति विश्वयोनिः
पाच्यांश्च सर्वान् परिणामयेद्यः ।
सर्वमेतद्विश्वमधितिष्ठत्येको
गुणांश्च सर्वान् विनियोजयेद्यः ।
तद्वेदगुह्योपनिषत्सु गूढं
तद्ब्रह्मा वेदते ब्रह्मयोनिम् ।
ये पूर्वं देवा ऋषयश्च तद्विदुस्
ते तन्मया अमृता वै बभूवुः ॥ ६ ॥

गुणान्वयो यः फलकर्मकर्ता
कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा
प्राणाधिपः संचरति स्वकर्मभिः ॥ ७ ॥

अङ्गुष्ठमात्रो रवितुल्यरूपः
संकल्पाहंकारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव
आराग्रमात्रो ह्यवरोऽपि दृष्टः ॥ ८ ॥

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ ९ ॥

नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥ १० ॥

संकल्पनस्पर्शनदृष्टिमोहैर्
ग्रासाम्बुवृष्ट्या चात्मविवृद्धिजन्म ।
कर्मानुगान्यनुक्रमेण देही
स्थानेषु रूपाण्यभिसंप्रपद्यते ॥ ११ ॥

स्थूलानि सूक्ष्माणि बहूनि चैव
रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां
संयोगहेतुरपरोऽपि दृष्टः ॥ १२ ॥

अनाद्यनन्तं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥

भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् ।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥ १४॥

इति श्वेताश्वतरोपनिषत्सु पञ्चमोऽध्यायः ॥ ५॥

६.

स्वभावमेके कवयो वदन्ति
कालं तथान्ये परिमुह्यमानाः।
देवस्यैष महिमा तु लोके
येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ १॥

येनावृतं नित्यमिदं हि सर्वं
ज्ञः कालकालो गुणी सर्वविद्यः ।
तेनेशितं कर्म विवर्तते ह
पृथ्व्याप्यतेजोनिलखानि चिन्त्यम् ॥ २॥

तत्कर्म कृत्वा विनिवर्त्य भूयस्
तत्त्वस्य तत्त्वेन समेत्य योगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा
कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥ ३॥

आरभ्य कर्माणि गुणान्वितानि
भावांश्च सर्वान् विनियोजयेद्यः ।
तेषामभावे कृतकर्मनाशः
कर्मक्षये याति स तत्त्वतोऽन्यः ॥ ४॥

आदिः स संयोगनिमित्तहेतुः
परस्त्रिकालादकलोऽपि दृष्टः ।
तं विश्वरूपं भवभूतमीड्यं
देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ ५॥

स वृक्षकालाकृतिभिः परोऽन्यो
यस्मात् प्रपञ्चः परिवर्ततेऽयम् ।
धर्मावहं पापनुदं भगेशं
ज्ञात्वात्मस्थममृतं विश्वधाम ॥६॥

तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्
विदाम देवं भुवनेशमीड्यम् ॥७॥

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥८॥

न तस्य कश्चित्पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ॥९॥

यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतः ।
देव एकः स्वमावृणोति स नो दधाद्ब्रह्माप्ययम् ॥१०॥

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥११॥

एको वशी निष्क्रियाणां बहूनाम्
एकं बीजं बहुधा यः करोति ।
तत्मात्मस्थं येऽनुपश्यन्ति धीरास्
तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२॥

नित्यो नित्यानां चेतनश्चेतनानाम्
एको बहूनां यो विदधाति कामान् ।
तत्कारणं सांख्ययोगाधिगम्यं
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥ १४॥

एको हंसो भुवनस्यास्य मध्ये
स एवाग्निः सलिले संनिविष्टः ।
तमव विदित्वाति मृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥ १५ ॥

स विश्वकृद्विश्वविदात्मयोनिर्
ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः
संसारमोक्षस्थितिबन्धहेतुः ॥ १६॥

स तन्मयो ह्यमृत ईशसंस्थो
ज्ञः सर्वगो भुवनस्यास्य गोप्ता ।
य ईशे अस्य जगतो नित्यमेव
नान्यो हेतुर्विद्यत ईशनाय ॥ १७॥

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १८॥

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥ १९॥

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ २०॥

तपः प्रभावाद् देवप्रसादाच्च
ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं
प्रोवाच सम्यगृषिसंघजुष्टम् ॥ २१ ॥

वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः ॥२२॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ २३ ॥

इति श्वेताश्वतरोपनिषत्सु षष्ठोऽध्यायः ॥ ६ ॥

इति कृष्णयजुर्वेदीया श्वेताश्वतरोपनिषत् संपूर्णा ॥

Sadhu Ashram Sanskrit Mahavidyalaya
47

DATE DUE

Class No. _____ **Book No.** _____

Accession No. 550

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.



PRICE RUPEE ONE